श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ अष्टाशीतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ अष्टाशीतितमः सर्गः ॥

## लक्ष्मणेन्द्रजितो रुषा संवादो मिथो युद्धं च

विभीषणवचः श्रुत्वा रावणिः क्रोधमूर्च्छितः।
अब्रवीत् परुषं वाक्यं क्रोधेनाभ्युत्पपात च ॥ **6.88.1** ॥

उद्यतायुधनिस्त्रिंशो रथे सुसमलङ्कृते।
कालाश्वयुक्ते महति स्थितः कालान्तकोपमः ॥ **6.88.2** ॥

महाप्रमाणमुद्यम्य विपुलं वेगवद् दृढम्।
धनुर्भीमबलो भीमं शरांश्चामित्रनाशनान् ॥ **6.88.3** ॥

तं ददर्श महेष्वासो रथस्थः समलङ्कृतः।
अलङ्कृतममित्रघ्नो रावणस्यात्मजो बली ॥ **6.88.4** ॥

हनूमत्पृष्ठमारूढमुदयस्थरविप्रभम्।
उवाचैनं सुसंरब्धः सौमित्रिं सविभीषणम् ॥ **6.88.5** ॥

तांश्च वानरशार्दूलान् पश्यध्वं मे पराक्रमम्।
अद्य मत्कार्मुकोत्सृष्टं शरवर्षं दुरासदम् ॥ **6.88.6** ॥

मुक्तवर्षमिवाकाशे धारयिष्यथ संयुगे।
अद्य वो मामका बाणा महाकार्मुकनिःसृताः।
विधमिष्यन्ति गात्राणि तूलराशिमिवानलः ॥ **6.88.7** ॥

तीक्ष्णसायकनिर्भिन्नाञ्शूलशक्त्यृष्टितोमरैः।
अद्य वो गमयिष्यामि सर्वानेव यमक्षयम्॥ **6.88.8**॥

सृजतः शरवर्षाणि क्षिप्रहस्तस्य संयुगे।
जीमूतस्येव नदतः कः स्थास्यति ममाग्रतः॥ **6.88.9**॥

रात्रियुद्धे तदा पूर्वं वज्राशनिसमैः शरैः।
शायितौ तौ मया भूयो विसंज्ञौ सपुरःसरौ॥ **6.88.10**॥

स्मृतिर्न तेऽस्ति वा मन्ये व्यक्तं यातो यमक्षयम्।
आशीविषसमं क्रुद्धं यन्मां योद्धुमुपस्थितः॥ **6.88.11**॥

तच्छ्रुत्वा राक्षसेन्द्रस्य गर्जितं राघवस्तदा।
अभीतवदनः क्रुद्धो रावणिं वाक्यमब्रवीत्॥ **6.88.12**॥

उक्तश्च दुर्गमः पारः कार्याणां राक्षस त्वया।
कार्याणां कर्मणा पारं यो गच्छति स बुद्धिमान्॥ **6.88.13**॥

स त्वमर्थस्य हीनार्थो दुरवापस्य केनचित्।
वाचा व्याहृत्य जानीषे कृतार्थोऽस्मीति दुर्मते॥ **6.88.14**॥

अन्तर्धानगतेनाजौ यत्त्वया चरितस्तदा।
तस्कराचरितो मार्गो नैष वीरनिषेवितः॥ **6.88.15**॥

यथा बाणपथं प्राप्य स्थितोऽस्मि तव राक्षस।
दर्शयस्वाद्य तत्तेजो वाचा त्वं किं विकत्थसे॥ **6.88.16**॥

एवमुक्तो धनुर्भीमं परामृश्य महाबलः।
ससर्ज निशितान् बाणानिन्द्रजित् समितिञ्जयः॥ **6.88.17**॥

तेन सृष्टा महावेगाः शराः सर्पविषोपमाः।
सम्प्राप्य लक्ष्मणं पेतुः श्वसन्त इव पन्नगाः॥ **6.88.18**॥

शरैरतिमहावेगैर्वेगवान् रावणात्मजः।
सौमित्रिमिन्द्रजिद् युद्धे विव्याध शुभलक्षणम्॥ **6.88.19** ॥

स शरैरतिविद्धाङ्गो रुधिरेण समुक्षितः।
शुशुभे लक्ष्मणः श्रीमान् विधूम इव पावकः॥ **6.88.20** ॥

इन्द्रजित् त्वात्मनः कर्म प्रसमीक्ष्याभिगम्य च।
विनद्य सुमहानादमिदं वचनमब्रवीत्॥ **6.88.21** ॥

पत्रिणः शितधारास्ते शरा मत्कार्मुकच्युताः।
आदास्यन्तेऽद्य सौमित्रे जीवितं जीवितान्तकाः॥ **6.88.22** ॥

अद्य गोमायुसङ्घाश्च श्येनसङ्घाश्च लक्ष्मण।
गृध्राश्च निपतन्तु त्वां गतासुं निहतं मया॥ **6.88.23** ॥

क्षत्रबन्धुं सदानार्यं रामः परमदुर्मतिः।
भक्तं भ्रातरमद्यैव त्वां द्रक्ष्यति हतं मया॥ **6.88.24** ॥

विस्रस्तकवचं भूमौ व्यपविद्धशरासनम्।
हृतोत्तमाङ्गं सौमित्रे त्वामद्य निहतं मया॥ **6.88.25** ॥

इति ब्रुवाणं सङ्क्रुद्धः परुषं रावणात्मजम्।
हेतुमद् वाक्यमर्थज्ञो लक्ष्मणः प्रत्युवाच ह॥ **6.88.26** ॥

वाग्बलं त्यज दुर्बुद्धे क्रूरकर्मन् हि राक्षस।
अथ कस्माद् वदस्येतत् सम्पादय सुकर्मणा॥ **6.88.27** ॥

अकृत्वा कत्थसे कर्म किमर्थमिह राक्षस।
कुरु तत् कर्म येनाहं श्रद्धेयं तव कत्थनम्॥ **6.88.28** ॥

अनुक्त्वा परुषं वाक्यं किञ्चिदप्यनवक्षिपन्।
अविकत्थन् वधिष्यामि त्वां पश्य पुरुषादन॥ **6.88.29** ॥

इत्युक्त्वा पञ्च नाराचानाकर्णापूरिताञ्शरान्।
विजघान महावेगाल्लक्ष्मणो राक्षसोरसि॥ **6.88.30**॥

सुपत्रवाजिता बाणा ज्वलिता इव पन्नगाः।
नैर्ऋतोरस्यभासन्त सवितू रश्मयो यथा॥ **6.88.31**॥

स शरैराहतस्तेन सरोषो रावणात्मजः।
सुप्रयुक्तैस्त्रिभिर्बाणैः प्रतिविव्याध लक्ष्मणम्॥ **6.88.32**॥

स बभूव महाभीमो नरराक्षससिंहयोः।
विमर्दस्तुमुलो युद्धे परस्परजयैषिणोः॥ **6.88.33**॥

विक्रान्तौ बलसम्पन्नावुभौ विक्रमशालिनौ।
उभौ परमदुर्जेयावतुल्यबलतेजसौ॥ **6.88.34**॥

युयुधाते तदा वीरौ ग्रहाविव नभोगतौ।
बलवृत्राविव हि तौ युधि वै दुष्प्रधर्षणौ॥ **6.88.35**॥

युयुधाते महात्मानौ तदा केसरिणाविव।
बहूनवसृजन्तौ हि मार्गणौघानवस्थितौ।
नरराक्षसमुख्यौ तौ प्रहृष्टावभ्ययुध्यताम्॥ **6.88.36**॥

ततः शरान् दाशरथिः सन्धायामित्रकर्षणः।
ससर्ज राक्षसेन्द्राय क्रुद्धः सर्प इव श्वसन्॥ **6.88.37**॥

तस्य ज्यातलनिर्घोषं स श्रुत्वा राक्षसाधिपः।
विवर्णवदनो भूत्वा लक्ष्मणं समुदैक्षत॥ **6.88.38**॥

विवर्णवदनं दृष्ट्वा राक्षसं रावणात्मजम्।
सौमित्रिं युद्धसंयुक्तं प्रत्युवाच विभीषणः॥ **6.88.39**॥

निमित्तान्युप पश्यामि यान्यस्मिन् रावणात्मजे।
त्वर तेन महाबाहो भग्न एष न संशयः॥ **6.88.40**॥

ततः सन्धाय सौमित्रिः शरानाशीविषोपमान्।
मुमोच विशिखांस्तस्मिन् सर्पानिव विषोल्बणान्॥ **6.88.41**॥

शक्राशनिसमस्पर्शैर्लक्ष्मणेनाहतः शरैः।
मुहूर्तमभवन्मूढः सर्वसङ्क्षुभितेन्द्रियः॥ **6.88.42**॥

उपलभ्य मुहूर्तेन संज्ञां प्रत्यागतेन्द्रियः।
ददर्शावस्थितं वीरमाजौ दशरथात्मजम्।
सोऽभिचक्राम सौमित्रिं रोषात् संरक्तलोचनः॥ **6.88.43**॥

अम्ब्रवीच्चैनमासाद्य पुनः स परुषं वचः।
किं न स्मरसि तद् युद्धे प्रथमे मत्पराक्रमम्।
निबद्धस्त्वं सह भ्रात्रा यदा युधि विचेष्टसे॥ **6.88.44**॥

युवां खलु महायुद्धे वज्राशनिसमैः शरैः।
शायितौ प्रथमं भूमौ विसंज्ञौ सपुरःसरौ॥ **6.88.45**॥

स्मृतिर्वा नास्ति ते मन्ये व्यक्तं वा यमसादनम्।
गन्तुमिच्छसि यन्मां त्वमाधर्षयितुमिच्छसि॥ **6.88.46**॥

यदि ते प्रथमे युद्धे न दृष्टो मत्पराक्रमः।
अद्य त्वां दर्शयिष्यामि तिष्ठेदानीं व्यवस्थितः॥ **6.88.47**॥

इत्युक्त्वा सप्तभिर्बाणैरभिविव्याध लक्ष्मणम्।
दशभिस्तु हनूमन्तं तीक्ष्णधारैः शरोत्तमैः॥ **6.88.48**॥

ततः शरशतेनैव सुप्रयुक्तेन वीर्यवान्।
क्रोधाद् द्विगुणसंरब्धो निर्बिभेद विभीषणम्॥ **6.88.49**॥

तद् दृष्ट्वेन्द्रजिता कर्म कृतं रामानुजस्तदा।
अचिन्तयित्वा प्रहसन्नैतत् किञ्चिदिति ब्रुवन्॥ **6.88.50** ॥

मुमोच च शरान् घोरान् सङ्गृह्य नरपुङ्गवः।
अभीतवदनः क्रुद्धो रावणिं लक्ष्मणो युधि॥ **6.88.51** ॥

नैवं रणगताः शूराः प्रहरन्ति निशाचर।
लघवश्चाल्पवीर्याश्च शरा हीमे सुखास्तव॥ **6.88.52** ॥

नैवं शूरास्तु युध्यन्ते समरे युद्धकाङ्क्षिणः।
इत्येवं तं ब्रुवन् धन्वी शरैरभिववर्ष ह॥ **6.88.53** ॥

तस्य बाणैः सुविध्वस्तं कवचं काञ्चनं महत्।
व्यशीर्यत रथोपस्थे ताराजालमिवाम्बरात्॥ **6.88.54** ॥

विधूतवर्मा नाराचैर्बभूव स कृतव्रणः।
इन्द्रजित् समरे वीरः प्रत्यूषे भानुमानिव॥ **6.88.55** ॥

ततः शरसहस्रेण सङ्क्रुद्धो रावणात्मजः।
बिभेद समरे वीरो लक्ष्मणं भीमविक्रमः॥ **6.88.56** ॥

व्यशीर्यत महद्दिव्यं कवचं लक्ष्मणस्य तु।
कृतप्रतिकृतान्योन्यं बभूवतुररिन्दमौ॥ **6.88.57** ॥

अभीक्ष्णं निःश्वसन्तौ तौ युध्येतां तुमुलं युधि।
शरसङ्कृत्तसर्वाङ्गौ सर्वतो रुधिरोक्षितौ॥ **6.88.58** ॥

सुदीर्घकालं तौ वीरावन्योन्यं निशितैः शरैः।
ततक्षतुर्महात्मानौ रणकर्मविशारदौ।
बभूवतुश्चात्मजये यत्तौ भीमपराक्रमौ॥ **6.88.59** ॥

तौ शरौघैस्तथाकीर्णौ निकृत्तकवचध्वजौ।
सृजन्तौ रुधिरं चोष्णं जलं प्रस्रवणाविव॥ **6.88.60** ॥

शरवर्षं ततो घोरं मुञ्चतोर्भीमनिःस्वनम्।
सासारयोरिवाकाशे नीलयोः कालमेघयोः॥ **6.88.61** ॥

तयोरथ महान् कालो व्यतीयाद् युध्यमानयोः।
न च तौ युद्धवैमुख्यं क्लमं चाप्युपजग्मतुः॥ **6.88.62** ॥

अस्त्राण्यस्त्रविदां श्रेष्ठौ दर्शयन्तौ पुनः पुनः।
शरानुच्चावचाकारानन्तरिक्षे बबन्धतुः॥ **6.88.63** ॥

व्यपेतदोषमस्यन्तौ लघु चित्रं च सुष्ठु च।
उभौ तु तुमुलं घोरं चक्रतुर्नरराक्षसौ॥ **6.88.64** ॥

तयोः पृथक् पृथग् भीमः शुश्रुवे तलनिस्वनः।
स कम्पं जनयामास निर्घात इव दारुणः॥ **6.88.65** ॥

तयोः स भ्राजते शब्दस्तथा समरमत्तयोः।
सुघोरयोर्निष्टनतोर्गगने मेघयोरिव॥ **6.88.66** ॥

सुवर्णपुङ्खैर्नाराचैर्बलवन्तौ कृतव्रणौ।
प्रसुस्रुवाते रुधिरं कीर्तिमन्तौ जये धृतौ॥ **6.88.67** ॥

ते गात्रयोर्निपतिता रुक्मपुङ्खाः शरा युधि।
असृग्दिग्धा विनिष्पेतुर्विविशुर्धरणीतलम्॥ **6.88.68** ॥

अन्ये सुनिशितैः शस्त्रैराकाशे सञ्जघट्टिरे।
बभञ्जुश्चिच्छिदुश्चैव तयोर्बाणाः सहस्रशः॥ **6.88.69** ॥

स बभूव रणो घोरस्तयोर्बाणमयश्चयः।
अग्निभ्यामिव दीप्ताभ्यां सत्रे कुशमयश्च यः॥ **6.88.70** ॥

तयोः कृतव्रणौ देहौ शुशुभाते महात्मनोः।
सुपुष्पाविव निष्पत्रौ वने किंशुकशाल्मली ॥ **6.88.71** ॥

चक्रतुस्तुमुलं घोरं सन्निपातं मुहुर्मुहुः।
इन्द्रजिल्लक्ष्मणश्चैव परस्परजयैषिणौ ॥ **6.88.72** ॥

लक्ष्मणो रावणिं युद्धे रावणिश्चापि लक्ष्मणम्।
अन्योन्यं तावभिघ्नन्तौ न श्रमं प्रतिपद्यताम् ॥ **6.88.73** ॥

बाणजालैः शरीरस्थैरवगाढैस्तरस्विनौ।
शुशुभाते महावीर्यौ प्ररूढाविव पर्वतौ ॥ **6.88.74** ॥

तयो रुधिरसिक्तानि संवृतानि शरैर्भृशम्।
बभ्राजुः सर्वगात्राणि ज्वलन्त इव पावकाः ॥ **6.88.75** ॥

तयोरथ महान् कालो व्यतीयाद् युध्यमानयोः।
न च तो युद्धवैमुख्यं श्रमं चाप्यभिजग्मतुः ॥ **6.88.76** ॥

अथ समरपरिश्रमं निहन्तुं
　　समरमुखेष्वजितस्य लक्ष्मणस्य।
प्रियहितमुपपादयन् महात्मा
　　समरमुपेत्य विभीषणोऽवतस्थे ॥ **6.88.77** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टाशीतितमः सर्गः ॥